# shrI vidyAraNya aShTottarashata nAmAvaliH

# श्रीविद्यारण्याष्टोत्तरशतनामावली

## Document Information

Text title : vidyAraNyAShTottarashatanAmAvali

File name : vidyAraNya108nAma.itx

Category : aShTottarashatanAmAvalI, deities_misc, nAmAvalI, gurudev

Location : doc_deities_misc

Transliterated by : Venkata Sriram P venkatasriramp at yahoo.in

Proofread by : Venkata Sriram P venkatasriramp at yahoo.in Sunder Hattangadi

Description-comments : See corresonding stotram

Latest update : May 13, 2012

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 16, 2021

*sanskritdocuments.org*

shrI vidyAraNya aShTottarashata nAmAvaliH

# श्रीविद्यारण्याष्टोत्तरशतनामावली

श्रीविद्यारण्यमुनिध्यानम् -
अविद्यारण्यकान्तारे भ्रमतां प्राणिनां सदा ।
विद्यामार्गोपदेष्टारं विद्यारण्यगुरुं श्रये ॥

विद्याविद्याविवेकेन पारं संसारवारिधेः ।
प्रापयत्यनिशं भक्तांस्तं विद्यारण्यमाश्रये ॥

अथ श्रीविद्यारण्याष्टोत्तरशतनामावलिः ।
ॐ विद्यारण्यमहायोगिने नमः ।
ॐ महाविद्याप्रकाशकाय नमः ।
ॐ श्रीविद्यानगरोद्धर्त्रे नमः ।
ॐ विद्यारत्नमहोदधये नमः ।
ॐ रामायणमहासप्तकोटिमन्त्रप्रकाशकाय नमः ।
ॐ श्रीदेवीकरुणापूर्णाय नमः ।
ॐ परिपूर्णमनोरथाय नमः ।
ॐ विरूपाक्षमहाक्षेत्रस्वर्णवृष्टिप्रकल्पाय नमः ।
ॐ वेदत्रयोल्लसद्भाष्यकर्त्रे नमः ।
ॐ तत्त्वार्थकोविदाय नमः । १०
ॐ भगवत्पादनिर्णीतसिद्धान्तस्थापनप्रभवे नमः ।
ॐ वर्णाश्रमसारविदे नमः ।
ॐ निगमागमव्यवस्थात्रे नमः ।
ॐ श्रीमत्कर्णाटकराजश्रीराज्यसिंहासनप्रदाय नमः ।
ॐ श्रीमद्बुक्कमहीपालराज्यपट्टाभिषेककृते नमः ।
ॐ आचार्यकृतभाष्यादिग्रन्थवृत्तिप्रकल्पाय नमः ।
ॐ सकलोपनिषद्भाष्यदीपिकादिप्रकाशकृते नमः ।
ॐ सर्वशास्त्रार्थतत्त्वज्ञाय नमः ।
ॐ मन्त्रशास्त्राब्धिमन्थराय नमः ।

ॐ विद्वन्मणिशिरःश्लाघ्यबहुग्रन्थविधायकाय नमः । २०
ॐ सारस्वतसमुद्धर्त्रे नमः ।
ॐ सारासारविचक्षणाय नमः ।
ॐ श्रौतस्मार्तसदाचारसंस्थापनधुरंधराय नमः ।
ॐ वेदशास्त्रबहिर्भूतदुर्मतामहोधिशोषकाय नमः ।
ॐ दुर्वादिगर्वदावाग्नये नमः ।
ॐ प्रतिपक्षेभकेसरिणे नमः ।
ॐ यशोजैवाकज्योत्स्नाप्रकाशितदिगन्तराय नमः ।
ॐ अष्टाङ्गयोगनिष्णाताय नमः ।
ॐ साङ्ख्ययोगविशारदाय नमः ।
ॐ राजाधिराजसंदोहपूज्यमानपदाम्बुजाय नमः । ३०
ॐ महावैभवसम्पन्नाय नमः ।
ॐ औदार्यश्रीनिवासभुवे नमः ।
ॐ तिर्यगान्दोलिकामुख्यसमस्तबिरुदार्जकाय नमः ।
ॐ महाभोगिने नमः ।
ॐ महायोगिने नमः ।
ॐ वैराग्यप्रथमाश्रयाय नमः ।
ॐ श्रीमते नमः ।
ॐ परमहंसादिसद्गुरवे नमः ।
ॐ करुणानिधये नमः ।
ॐ तपः प्रभावनिर्धूतदुर्वारकलिवैभवाय नमः । ४०
ॐ निरंतरशिवध्यानशोषिताखिलकल्मषाय नमः ।
ॐ निर्जितारतिषड्वर्गाय नमः ।
ॐ दारिद्र्योन्मूलनक्षमाय नमः ।
ॐ जितेन्द्रियाय नमः ।
ॐ सत्यवादिने नमः ।
ॐ सत्यसंधाय नमः ।
ॐ दृढव्रताय नमः ।
ॐ शान्तात्मने नमः ।
ॐ सुचरित्राढ्याय नमः ।
ॐ सर्वभूतहितोत्सुकाय नमः । ५०
ॐ कृतकृत्याय नमः ।

ॐ धर्मशीलाय नमः ।
ॐ दांताय नमः ।
ॐ लोभविवर्जिताय नमः ।
ॐ महाबुद्धये नमः ।
ॐ महावीर्याय नमः ।
ॐ महातेजसे नमः ।
ॐ महामनसे नमः ।
ॐ तपोराशये नमः ।
ॐ ज्ञानराशये नमः । ६०
ॐ कल्याणगुणवारिधये नमः ।
ॐ नीतिशास्त्रसमुद्धर्त्रे नमः ।
ॐ प्राज्ञमौलिशिरोमणये नमः ।
ॐ शुद्धसत्त्वमयाय नमः ।
ॐ धीराय नमः ।
ॐ देशकालविभागविदे नमः ।
ॐ अतीन्द्रियज्ञाननिधये नमः ।
ॐ भूतभाव्यर्थकोविदाय नमः ।
ॐ गुणत्रयविभागज्ञाय नमः ।
ॐ सन्यासाश्रमदीक्षिताय नमः । ७०
ॐ ज्ञानात्मकैकदण्डाढ्याय नमः ।
ॐ कौसुंभवसनोज्ज्वलाय नमः ।
ॐ रुद्राक्षमालिकाधारिणे नमः ।
ॐ भस्मोद्धूलितदेहवते नमः ।
ॐ अक्षमालालसद्धस्ताय नमः ।
ॐ त्रिपुण्ड्राङ्कितमस्तकाय नमः ।
ॐ धरासुरतपस्सम्पत्फलाय नमः ।
ॐ शुभमहोदयाय नमः ।
ॐ चन्द्रमौलीश्वरश्रीमत्पादपद्मार्चनोत्सुकाय नमः ।
ॐ श्रीमच्छंकरयोगीन्द्रचरणासक्तमानसाय नमः । ८०
ॐ रत्नगर्भगणेशानप्रपूजनपरायणाय नमः ।
ॐ शारदाम्बादिव्यपीठसपर्यातत्पराशयाय नमः ।
ॐ अव्याजकरुणामूर्तये नमः ।

ॐ प्रज्ञानिर्जितगीष्पतये नमः ।
ॐ आज्ञावशीकृतगीष्पतये नमः ।
ॐ लोकानंदविधायकाय नमः ।
ॐ वाणीविलासभवनाय नमः ।
ॐ ब्रह्मानंदैकलोलुपाय नमः ।
ॐ निर्ममाय नमः ।
ॐ निरहंकाराय नमः । ९०
ॐ निरालस्याय नमः ।
ॐ निराकुलाय नमः ।
ॐ निश्चिंताय नमः ।
ॐ नित्यसंतुष्टाय नमः ।
ॐ नियतात्मने नमः ।
ॐ निरामयाय नमः ।
ॐ गुरुभूमण्डलाचार्याय नमः ।
ॐ गुरुपीठप्रतिष्ठिताय नमः ।
ॐ सर्वतन्त्रमन्त्रस्वतन्त्राय नमः ।
ॐ यन्त्रमन्त्रविचक्षणाय नमः । १००
ॐ शिष्टेष्टफलदात्रे नमः ।
ॐ दुष्टनिग्रहदीक्षिताय नमः ।
ॐ प्रतिज्ञातार्थनिर्वोढ्रे नमः ।
ॐ निग्रहानुग्रहप्रभवे नमः ।
ॐ जगत्पूज्याय नमः ।
ॐ सदानन्दाय नमः ।
ॐ साक्षाच्छङ्कररूपभृते नमः ।
ॐ महालक्ष्मीमहायन्त्रपुरश्चर्यापरायणाय नमः । १०८

॥ श्री विद्यारण्याष्टोत्तरशतनामावलि सम्पूर्णम् ॥

Encoded and proofread by Venkata Sriram P venkatasriramp at yahoo.in

pdf was typeset on April 16, 2021

Please send corrections to *sanskrit@cheerful.com*